दिनाङ्क : 04.09.25 सायम् - 06:20

मुख्यवार्ता:

- प्रधानमंत्री नरेन्द्र मोदी सिङ्गापुरस्य प्रधानमन्त्रिणा लारेन्स वोङ्ग इत्यनेन सह वार्तां करोति।
- भारतस्य सिङ्गापुरस्य च मध्ये पञ्च संधिपत्राणि हस्ताक्षरितानि
- कृषि मन्त्रिणा शिवराज-सिंह चौहानेन पञ्जाबे जलौघ स्थिति: समीक्षिता।
- वृष्टि जलौघयो: च कारणात् जम्मू-कश्मीरे प्रारब्धा: चर्तुणां रेलयानानां सेवा: स्थगिता:।
- अमरीकी – ओपन टेनिस स्पर्धाया: पुरूष युगल उपान्त्ये अद्य सायं युकी भांबरी माइकल वीनसस्य युगलस्य साम्मुख्यं ब्रिटिश-युगलेन नील-स्कुप्स्की, जो सैलिसबरी-इत्येने भवति।

<u>प्रधानमंत्री - सिङ्गापुर</u>

प्रधानमंत्री नरेन्द्र मोदी सिङ्गापुरस्य प्रधानमन्त्रिणा लारेन्स वोङ्ग इत्यनेन सह वार्तां करोति, भारतस्य सिङ्गापुरस्य च मध्ये पञ्च संधिपत्राणि हस्ताक्षरितानि। भारतं सिङ्गापुरं च अद्य सिविल एवियेशन नागरिकविमाननं, स्पेस आन्तरिक्षं, कौशलविकासं, डिजिटलसम्पत्त्याः नवीनीकरणं, इति विषयक पञ्चसन्धिषु हस्ताक्षरं कृतवती। अद्य नवदिल्लीनगरे प्रधानमन्त्रिण: नरेन्द्रमोदिनः सिङ्गापुरस्य प्रधानमन्त्रिणः -लोरेन्स-वोङ्गस्य च मध्ये वार्तायां पत्र-संधय: जाता:। मोदी अवदत् यत् आतङ्कवादविषये उभयोः देशयोः एकान्यचिन्ता अस्ति। सः अवदत् यत् आतङ्कवादविरुद्धं एकीकृत्य युद्धं कर्तुं सर्वेषां मानवीयदेशानां कर्तव्यम् इति उभयोः देशयोः मतम्। मोदिना प्रोक्त यत् उभौ देशौ आसियान देशाना सहयोगाय, हिन्द-प्रशान्त-क्षेत्रे-शान्तये स्थिरतायै: च संयुक्ता दृष्ट्या अग्रे सारयिष्यत:

<u>पीएम-वोङ्ग-उद्घाटनः</u>

प्रधानमन्त्री नरेन्द्र मोदी तथा सिङ्गापुरस्य प्रधानमन्त्री लारेन्स वोङ्ग वर्यः अद्य जे. एन. पोर्ट पी. एस. ए. मुम्बई टर्मिनल (बि. एम. सि. टी.) इत्यस्य द्वितीयस्य चरणस्य उद्घाटनम् अकरोत्। केन्द्रीय-नौवहन-जलमार्ग-मन्त्रिणः सर्वानन्द-सोनोवाल- वर्यः उद्घाटने अंतर्जालिय-माध्यमेन सम्मिलितः, महाराष्ट्रस्य मुख्यमन्त्री देवेन्द्र-फड्नविस:, केन्द्रीय-नौवहन-जलमार्ग-राज्य-मन्त्री: शान्तनु-ठाकुर: च नवी-मुम्बई-नगरे उद्घाटने उपस्थितौ उपस्थिता: सन्।

<u>पञ्जाबराज्यस्य कृषि-मन्त्रिण:</u>

पञ्जाबराज्यस्य कृषि-मन्त्री शिवराजसिंह चौहानः कृषिकार्यमन्त्री गम्भीरतया जलप्लावितस्य सीम-राज्यस्य वर्तमानस्थितिं अवलोकयितुं पञ्जाब-राज्यं प्राप्तवान्। पञ्जाब-राज्यस्य राज्यपालः गुलाब-चन्द-कटारिया: अमृतसर, पठानकोट, गुरुदासपुर, तरन तारन, फ़िरोज़पुर इत्येतेषु पञ्चसु सर्वाधिकप्रभावितमण्डलेषु जलप्लावनस्य स्थिति विषये विस्तृतं प्रतिवेदनं केन्द्रीयमन्त्रिणे समर्पितवान् इति ए. आई. आर.-संवाददाता सूचितवान्। केन्द्र-राज्य-सर्वकारस्य सम्बद्ध-अधिकारिण: समीक्षा-सभायां आहूता:। ततः पूर्वं चौहानः अमृतसर-गुरुदासपुर-कपूरथला-ग्रामान् अपि गच्छति।

**जीएसटी- औद्योगिक**

जीएसटी-परिषदा सर्वसम्मत्या दैनन्दिन-उपयोगस्य अनेकेषां-वस्तूनां दरे न्यूनतायै अनुमोदनं कृतम्। येन अधिकांशतः-वस्तूनि, सेवाः च न्यूनार्घतया भवेयुः। परिषद् अप्रत्यक्षकरप्रणालीं पञ्च प्रतिशतं, द्वादश प्रतिशतं, अष्टादश प्रतिशतं, अष्टाविंशति प्रतिशतं च इत्थं चतुर्स्तरीयसंरचनया सरलीकृत्य पञ्च प्रतिशतं अष्टादश प्रतिशतं च द्विस्तरीयसंरचनायाम्। पीएचडीसी वाणिज्यसङ्घस्य अध्यक्षः हेमन्तजैनः अवदत् यत् जीएसटी संशोधनं सर्वकारस्य द्विपक्षीया रणनीतिः अस्ति। या सामान्यजनस्य जीवनं सुलभं करिष्यति तथा च उद्योगस्य कृते जीएसटी प्रक्रियां सरलां करिष्यति। इतरथा भारतस्य एसोसिएटेड वाणिज्य-उद्योगसङ्घस्य महासचिवः मनीषसिंघलः अवदत् यत् जीएसटी-सांशोधनेन नूतने देशे उत्पादनं निवेशं च वर्धयिष्यते।

**स्वास्थ्य सेवा पर जीएसटीः**

तमालेः, विलासवस्तूभिः च सहितानां विशिष्टानां वस्तूनां कृते चत्वारिनष्ट प्रतिशतस्य अतिरिक्तः स्तरः प्रवर्तितः अस्ति। नवदिल्ली-नगरे जी. एस्. टी. परिषदः सम्मेलनस्य अनन्तरं प्रसारमाध्यमान् सम्बोधयती केन्द्रीय-वित्तमन्त्री निर्मला सीतारमणः अवदत् यत् नूतनानि मूल्यानि अस्य मासस्य द्वाविंशाति दिनाङ्कात्, नवरात्र्याः प्रथमदिवसात् प्रवर्तन्ते इति, येन स्वातन्त्र्यदिने प्रधानमन्त्रिणः नरेन्द्रमोदीवर्यस्य जी. एस. टी. कृते दीपावलि-उपहारस्य प्रतिज्ञां पूरयति।

**जम्मू-कश्मीर-ऋतुः**

जम्मू-कश्मीरे स्थानीय ऋतु विभागेन अद्य ऋतु विषये पूर्वानुमानां कृतम् तेन प्रकटयता प्रोक्तं यत् सामान्यतः अद्य मेघाच्छादनं भविष्यति। केषुचित् स्थानेषु मन्दात् मध्यमा वृष्टिः गर्जनेन सह बिन्दुः पतिष्यति। राजमार्गे केषुचित् स्थलेषु भू-स्खलनं जायमानमस्ति अपि च प्रस्तराणि पतन्ति। अस्मात कारणात जम्मू कटरयोः प्रारब्धाः चर्तुणां रेलयानानां सेवाः स्थगिताः।

**कृष्णाङ्गार – विपरिणामः**

केन्द्रीय- कृष्णाङ्गारस्य तथा खनिजस्य मन्त्री जी. किशन रेड्डी अघोषयत् यत् भारते गृह्योद्योगानां याचनां पूरयितुं खनिज व्यापारः परिवर्तिष्यते। मुम्बय्यां कृष्णाङ्गारस्य खनिजस्य च हितधारकेभ्यः स्टार-रेटिंग-पुरस्कार-समारोहे श्री रेड्डी आगामिषु वर्षेषु कृष्णाङ्गारस्य याचनायां वर्धनस्य आशा प्रकटिता। तेन अनुमानं व्यक्तं यत् सहभागिता वर्धित्वा पञ्चाशत् प्रतिशतं भविष्यति।

**नड्डा - सेवाकर**

स्वास्थ्यमन्त्री जयप्रकाश नड्डा अवदत्- जीएसटी संशोधनेन स्वास्थ्यसेवा सर्वेषां कृते अधिका सुलभा भविष्यति। एतेन निर्धनानाम् मध्यमवर्ग्ं च प्रति सर्वकारस्य प्रतिबद्धता पुनः पुष्टा जाता सः अवदत्। स्वास्थ्यमन्त्री जयप्रकाश.नड्डा इत्यनेन उक्तं यत् वस्तु सेवाकर-जीएसटी-संशोधनेन स्वास्थ्यसेवायाः व्ययः न्यूनीभविष्यति, जनानां जीवनं च परिष्कृतं भविष्यति। जनसंचारमाध्यमेषु नड्डामहोदयेन उक्तं यत् जीएसटीसंशोधनं निर्धनानां मध्यमवर्गस्य च प्रति सर्वकारस्य प्रतिबद्धतां प्रतिबिम्बयति। सः अवदत् यत् कर्करोगस्य, दुर्लभरोगाणां च चिकित्सासहितस्य षट्त्रिशंत जीवनरक्षकौषधानां जीएसटी शून्यप्रतिशतं यावत् न्यूनीकृतम्। नड्डा अवदत् यत् स्वास्थ्यं जीवनबीमा च जीएसटीतः मुक्तं कृतम्। औषध-चिकित्सा-उपकरण-निदान-विषये अपि जीएसटी-इत्येतत् न्यूनीकृतम् इति सः अवदत्। नड्डामहोदयः अवदत् यत् एषः निर्णयः सर्वेषां कृते सुलभायाः स्वास्थ्यसेवायाः दिशि महत् सोपानम् अस्ति।

**जोशी- पलांडु**

केन्द्रीय उपभोक्तृ, खाद्य तथा लोकवितरण एवं नवीन तथा नवीकरणीय ऊर्जा मन्त्री श्री प्रह्लाद जोशी अद्य अत्र विक्रयणार्थं केन्द्रीय भण्डारस्य च मोबाईल वैन इत्यस्य ध्वजं कृत्वा पलांडुनां विक्रयः चर्तुविंशति रुप्यकाणि प्रति किलोग्रामे प्रारब्धः। अयं कार्यक्रम: उपभोक्तृभ्यः आवश्यकं शाकं न्यून मूल्ये उपलब्धं कर्तुं अस्ति।

**जोशी – नीति आयोग**

नीति आयोगस्य सी इ ओ, बी. वी. आर. सुब्रह्मण्यम् प्रौद्योगिकी स्वामित्वस्य आवश्यकतायां बलं दत्तवान्। कोऽअपि देश: अधमर्णस्य प्रविधौ निर्भर: नैव भवितुमर्हति।

**अमरीकी – ओपन टेनिस**

अमरीकी – ओपन टेनिस स्पर्धाया: पुरूष युगल उपान्त्ये अद्य सायं युकी भांबरी माइकल वीनसस्य युगलस्य साम्मुख्यं ब्रिटिश-युगलेन नील-स्कुप्स्की, जो सैलिसबरी-इत्येने भविष्यति। पुरूषैकले नोवाक जोकोविच: श्व: उपान्त्ये स्पेनस्य कार्लोस अल्कराजेन सह क्रीडिष्यति।

**।। इति वार्ता:।।**